**डॉ. दिनेश्वर मिश्र**
**प्रवक्ता दर्शन**

# दर्शनस्वरूपम्

भारतीयदर्शनपरम्परायामनादिकालेनान्वेषणस्य प्रवृतिः अस्ति। यदस्यां सृष्टिरचनायां कानि कानि मूलतत्वानि। उद्देश्यात् बिना इमे संसारिणः न कार्ये प्रवृत्ताः भवन्ति। कुमारिलभट्टस्य श्लोकवार्तिकवचनमिदम् –**''प्रयोजनमननुद्दिश्य मन्दोऽपि न प्रवर्तते''** मानवमात्रस्योद्देश्यमस्ति सुखप्राप्तिः तत् सुखं कीदृशं ? तद्विषये उपनिषद् ब्रवीति **''यो वै भुमा तत्सुखं नाल्पे सुखमस्ति।''** परमानन्दस्यास्य प्राप्तिः त्रिविधतापानि आध्यात्मिकाधिदैविकाधिभौतिकानि इमानि तापानि शमितानि नष्टानि भवेयुः तदर्थं दर्शनोद्गमः।

इदं चेतनाचेतनं जगत् दृष्ट्वा जिज्ञासैषोत्पद्यते यत् जगतः अस्य कारणं किं? अस्याः जिज्ञासायाः एव समाधानाय भारतीयदर्शनानामुत्पत्तिर्जाता अस्ति। परमात्मा, जीवात्मा, जगत् एतत्रयाणां विचारविमर्षणमेव दर्शनशास्त्रम्। भारतीयवाङ्गमयस्य प्रथमग्रन्थे ऋग्वेदे **''को अद्धा वेद त इहप्रवोचत् कुतः अजाता इयं सृष्टिः''** इत्यादिषु इत्यादयो वा विचाराः प्राप्यन्ते। **अर्थात्**–विचित्रसंसारमिदं कुतः केन सृजितमिति। दार्शनिकगम्भीरसमस्यानां चिन्तनं ऋग्वेददार्शनिकनासदीयसूक्ते बृहद्रूपेण विशालरूपेण प्राप्यते। यस्मिन् जगति भूत्वा यस्योपादानैः जीवनस्य निर्बहणं भवति तस्य स्वरूपं किम् ? दर्शनस्य उत्पर्त्तेनन्तरं इति शब्दस्य विवेचनं प्रसाध्यते। दर्शनशब्दस्य उत्पत्तिः **''दर्शनं'' ''दृशिर–प्रेक्षणे''** इति धातुना जाताऽस्ति। **''दृश्यते अनेनेति दर्शनम्''** यस्यार्थः येन माध्यमेन सूक्ष्मरूपस्य दर्शनं सम्भवति एतस्याभिप्रायोऽस्ति यद्दर्शनं इन्द्रियजन्यनिरीक्षणं भवितुमर्हति यद्वा विचारै अन्तर्दृष्ट्या चानुभूयते। अनुसन्धानमतिरिच्य जीवनस्य अन्याप्येका महत्वपूर्णासार्थकता अस्ति। सन्दर्भेऽस्मिन् बृहदारण्यकोपनिषदः वचनमिदं ध्यातव्यमिति –

**''आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः''**

इत्यादिश्रुतिवाक्यैः आत्मसाक्षात्कारमभिलक्ष्य श्रवणादि उपायानां विधानमकृतमस्ति। स्मृतिर्भिपि –

**''श्रोतव्यः श्रुतिवाक्येभ्योः मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येयं एते दर्शनहेतवः।''**

एवमुक्तवा दर्शनश्रवणमननादीनां समर्थनं कृतम्। **''दृशिर प्रेक्षणे''** धातुना यदि दर्शनशब्दस्य निर्माणं स्वीकृतम् तर्हि **''प्रेक्षण''** शब्दस्यार्थो भवति **''प्रकृष्टरूपेण दर्शनमिति।''** अतः अन्तर्दृष्ट्या दर्शनमेव **''दर्शन''** शब्दस्य लक्ष्यार्थो भवति, प्रेक्षणशब्दस्या– धारेणास्माभिः वक्तुं शक्यते यत् (तत्वज्ञानम्) अर्थात् – सत्तायाः यथार्थावबोधो एव दर्शनम्। ईशावास्योपनिषदि अपि एतस्मिन् एवार्थे **''दर्शन''** शब्दस्य प्रयोगो कृतः।

**हिरण्मयेन पात्रेण सत्यस्य पिहितं मुखम्।**
**तत्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।**